# वेदेषु आयुर्वेदिकचिकित्साविज्ञानम्

**डॉ० पुष्पादीक्षित:***

**सारांश: (Abstract)-**

अस्मिन् शोधनिबन्धे आयुर्वेदिचिकित्साविज्ञानस्य अग्निकर्म, ओषधिविज्ञानम्, सृष्टिविज्ञानम्, मनोविज्ञानम्, गर्भपरीक्षणविज्ञानम् (अल्ट्रासाउण्ड), निदानञ्चेत्येतेषां विविधविषयानाम् विवेचनम् वर्वते।

**कुंजिका (Keywords)** : निदानं, अग्निकर्म, ओषधि:, भैषज्यवेद:, व्याधि:।

**Conflict of Interest : Non** (नास्ति) **Ethical Clearance : N/A** (अनुपयुक्त:)

वेदो विश्वस्य ज्ञानरूप:, नित्य: सृष्ट्यादौ च स: तपोनिष्ठानामन्त: स्फुरति। स च ऐहिकामुष्मिक सकलसंस्थापक:, मनुष्याणां कृते कर्त्तव्याकर्त्तव्यनिर्देशक:, सकलब्रह्माण्डज्ञान-सवांहकोऽस्ति। इहलोके तु प्रत्यक्षेणैव सर्ववाङ्मयेषु, मुख्यावलम्बनभूतो वेद एव। सम्पूर्णेऽपि विश्वे विज्ञानावलम्बिन: सुसंस्कृतनिष्ठाश्च स्वमतं वेदप्रतिपादितै: प्रमाणै: परिपुष्टं कुर्वन्ति। यतोहि विज्ञानपरिनिष्ठा: मन्त्रा: सृष्टेरादौ परमेश्वरेण महर्षिभ्य: प्रदत्ता:। वेदो ज्ञानकर्मोपासनारूपभेदात् ऋग्यजुस्सामथर्वाभिश्च चत्वारो भवन्ति। वेदविषये आपस्तम्बेन प्रोक्तम्– "मन्त्रब्राह्मणयोर्वेदानामधेयम् येन हि यागानामनुष्ठानं निष्पन्नतामुपैति देवतानाञ्च स्तुतिविधानं मन्त्रोल्लिखितमस्ति। स मननात् मन्त्र इति। ब्राह्मणं तु तन्मन्त्राणां विनियोजकमस्ति ब्राह्मणमपि भागत्रये विभक्तमस्ति। प्रथमो भाग: ब्राह्मणम्, द्वितीयोभाग: आरण्यकम्, तृतीयोभाग: उपनिषदिति कथ्यते। अत: अतिमहत्त्वपूर्णं वैदिकसाहित्यमिति। सम्पूर्णब्रह्माण्डस्य रहस्यं, तेषां विकाशस्य वैशिष्ट्यञ्च मूलत: वेदसाहाय्येनैव ज्ञेयं भवति। ते च वेदा: परा अपरा चेति द्वे विद्ये वर्तेते। अपरा विद्या एव विज्ञानम्। तत्र तत्र यया पृथ्वी तृणमारभ्य प्रकृतिपर्यन्तानां पदार्थानां ज्ञानेन यथावदुपकारग्रहणं क्रियते स अपरोच्यते। वेदा: न तु केवलं भारतीयानां न्यास:, अपितु सर्वेषां जङ्गमादिमनुष्याणामुत्कर्षविज्ञानरूप:। एवञ्च पृथिव्यन्तरिक्षद्युलोकस्थितानामग्निवायु-सूर्यादिदेवानां विशिष्टं ज्ञानं निदर्शेति। वेदा हि विविधज्ञानविज्ञानराशय: ज्ञानोपकारका: सन्ति।

## आयुर्वेदिक चिकित्सायामग्निकर्म –

वैदिकवाङ्मये आयुर्वेदिकचिकित्सायाम् अग्निकर्मण: महत्त्वं प्रतिपादितम् वैदिकविज्ञानविषये कथितमस्ति यत् निखिलेऽपि ब्रह्माण्डे मुख्यत: त्रया अग्नय: सन्ति-प्रथमो तावत् भूतले, द्वितीय अन्तरिक्षे, तृतीय: द्युलोके[1], इयमेव वेदत्रयी इति ज्ञायते। यथा– तैतरेयारण्यके **एषा त्रय्येव विद्या तपति** (तै.३) अग्ने: गुण: दाहकत्वमिति। अत: अयं जलवनौषधिपशुपुरुषाश्वनस्पतिसोमगौ-मृगादीनां मध्ये अनेकरूपेषु स्थिता अस्ति (अर्थवेद १९.३.२) यस्मिन् जले अग्निरूपविद्युदस्ति। तदग्नौषधीनां पालको भवति। यथा अथर्ववेदे- "**अपामग्नि: स्तनूभि: संविदानां औषधीनामधिपा बभूवा**" (अथ. ४-१५-१०) एवं यजुर्वेदेऽपि (१२/३७) आधुनिकेऽपि वैज्ञानिका: जले अग्नेर्शक्तिरिति ज्ञात्वा वैद्युतीकरणं प्रतिपादयन्ति।

हुतद्रव्यश्चैव सर्वे प्राणिन: वायुना आरोग्यमाप्नुवन्ति। अग्नौ हुतं द्रव्यं वाष्पीभूय गगनमण्डले व्याप्नोतीति पुनातीति च। हुतद्रव्यैवेर सर्वे प्राणिन: वायुना आरोग्यमाप्नुवन्ति। त देव वाष्पीभूतजलं ब्रीह्याद्यन्तेषु वनस्पत्यादिषु च औषधीरूपेण जायते। यथा शुक्लमाध्यन्दिनीये भाष्ये उवटाचार्य:-'अग्नेवै' धूमो जायते धूमादभ्रोऽभ्राद्वृष्टि:।

यज्ञपरिचालकौ देवौ सोमाग्नी इति ज्ञायते अत: कथितमपि "अग्नीसोमात्मकं जगत्" तत्र सोमोऽन्नमिति, अग्नित्तेति उच्यते। अग्निसोमयो: सम्बन्धस एव यज्ञ:। यज्ञरूप एव सत्यग्निरिति ज्ञायते। स हि एकत्वं भवति। तथा च सच

* पूर्वयोगप्रशिक्षिका, काशीहिन्दूविश्वविद्यालयस्य, वाराणसी, E-mail : drpushpa07@gmail.com

सत्याग्नि: त्रिविधो: भवन्ति-प्राण: वायु:, आन्नाद: (अग्निवा:) तथा प्राणो वै आप:, छान्दोग्ये उपनिषदि कथितम् अन्नमयं हि सौम्यमन:।

वेदेषु चिकित्साविज्ञानतत्त्वानि परिपूर्णानि सन्ति। सर्वप्रथमं सृष्टिप्रक्रियायां वैज्ञानिकं महत्त्वम् वेदेषु परिलक्ष्यते। विज्ञानस्य न किमपि क्षेत्रमवशिष्यते यत् वेदेषु संस्कृतसाहित्ये वा नोपलक्ष्यते। केवलम् अन्वेषणस्यावश्यकता विद्यते सर्वमिदं क्षेत्रम् विज्ञानस्य यत्र कुत्रापि अवश्यमेव वेदेषु वैदिकवाङ्मयेवा परिलक्ष्यते। प्रारंभे सृष्टौ सर्वप्रथमम् आप: जलमेवासीत्, ऋग्वेदे आप एव ससर्जादौ –

**आपो ह यत् वृहतीर्विश्वमायन गर्भदधाना जनयन्तीरग्निम्।**
**ततो देवानां समवर्तताऽसुरेक: कस्मै देवाय हविषा विधेम।**

-(ऋग्वेद १०.१२७.७)

ह प्रसिद्धौ यद् यदा पुरापो जलानि विश्वमायन् प्रापु: कीदृश: आप: वृहती तथा गर्भ दधाना हिरण्यगर्भ लक्षणं दधाना अत एवाग्निं जनयन्ती अग्निरूपम् हिरण्यगर्भ: जनयन्त्य: उत्पादयिष्यन्त्य:, ततो गर्भात् देवानां असु: प्रणरुप: आत्मा लिङ्गशरीररूपो हिरण्यगर्भ: समवर्ततं उद्पद्यत कस्मै प्रजापतिरूपाय देवाय हिरण्यगर्भाय हविषा विधेम इति। तेन जलेन हिरण्यगर्भ: प्रजापति: एव सर्वप्रथमोत्पन्नोऽभवत्। शतपथब्राह्मणेऽपि सलिलमेवाग्रेऽऽसीत् –

**“आपो ह वा इदमग्रे सलिलमेवास।” (श.ब्रा. ११,१,६,१)**
**“अग्निर्वा इदं सर्वमाप्तम् (श.ब्रा० १,१,१,१४, २,१,१,१४, ४,५,७,७)**

गर्भजनयन्ती तस्मादाप: सर्वप्रथम: हिरण्यगर्भ: प्रजापति: सवसमुद्भूत: प्रथमशरीरी अभवत्। ऋग्वेदे प्राप्तमिदं मन्त्रम्।

**हिरण्यगर्भ: समर्वततताग्रे, भूतस्य जात: पतिरेक आसीत्**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। (ऋ. १०,१२१.१)**

अत्र इदम् अवधेयं यत् गर्भं दधाना जनयन्तीरग्निम यद् आपो अस्मिन् ऋग्वेदे अस्ति तदेवापो भौतिकी लौकिकी शरीरे मातृकुक्षौ सैव हिरण्यगर्भस्वरूप: मांसपिण्ड: गर्भ: गर्भे वृहती अणोर्मध्ये जीवितायामवस्यायाम् संचरणशील: विद्यते। चिकित्साविज्ञाने मातृकुक्षौ जलान्तर्गते तदेव गर्भ: (Water bag) इति नाम्ना आवरणे संजीवित: संरक्षित: विद्यते। ‘अग्निं जनयन्ती’ इत्यस्मिन् गर्भसम्बन्धे उपलक्षणमात्रमेव। गर्भस्तु जलान्तरगते (In the water bag) अपि उष्णमेव भवति यतो हि प्रसवकालेऽपि उष्णमेव आप: सर्वप्रथमं रुधिरसंयुक्त गर्भात बहिनिर्गच्छति तेन सहैव उष्णोगर्भ: सजीव: मांसपिण्ड: बहि: आयाति। सैव गर्भ: कथमुष्णम्?

गर्भाधानकालेऽपि पुरुषस्य यद्वीर्य: निर्गच्छति तदैवोष्णमेव भवति इति वैज्ञानिकं सत्यं तत्त्वम् एतस्मादेवोक्तम् **गर्भंदधाना जनयन्तीरग्निमिति** वैदिकवाङ्मये।

आधुनिकी विज्ञाने चिकित्साविज्ञाने वा सजीव: गर्भस्तु जलान्तर्गते मातृकुक्षौ प्रत्यक्षमेव दृश्यते (ळत्ूra एदल्ह्) इति यन्त्रेण ज्ञायते यत् गर्भस्य का स्थिति:। अस्माकं वैदिकवाङ्मये पुरुषसूक्ते उत्तरनारायणे शुक्लयजुर्वेदमाध्यन्दिन-संहितायाम् अस्य चिन्तनं विद्यते –

**प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।**
**तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा।।**

-(शु.य.मा.वा.सं. उत्तरनारायणम् अध्याय ३१/कण्डिका १९)

वैदिकवाङ्मये मनोविज्ञानस्यापि चिन्तनं विद्यते। मनसा एव विज्ञानस्य कल्पना चेतना प्रसूता। मनसा यथैव कलप्यते तथैव क्रियते, यथैव क्रियते तथैव परिणामोऽपि भुज्ते इति एतस्मादेव मनसा स्वस्थचिन्तनमेव कर्त्तव्यम। छान्दोग्योपनिषदि उक्तम् आहारशुद्धौ सत्वशुद्धि:। ईशावास्योपनिषदि अपि उक्तम् –

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्याम् जगत्**
**तेन त्यक्तेन भुञ्जीथा: मा गृध: कस्यस्विद् धनम् ॥ (ई.वा.उ. १)**

मनसा त्यागेन भोक्तव्यं लोकोक्तिरियं यत् स्वस्थशरीरे स्वस्थमस्तिष्क: निवसति। यतो हि आरोग्य प्राप्त्यर्थं मनस्तु स्वस्थम् भवितव्यम्। यतो हि स्वस्थ मनसा चिन्तनम् यद्भवति तदेव वैज्ञानिकचिन्तम्। एतस्मादेव मनस्तु शिवसंकल्पयुक्तोऽस्तु इति प्रार्थना कृता शिवसंकल्पसूक्ते शुक्लयजुर्वेदे माध्यन्दिनवाजसनेयिसंहितायाम्-

**यज्जाग्रतो दूरमुदैति दैवं, तदुसुप्तस्य तथैवेति।**
**दूरङ्गमं ज्योतिषां ज्योतिरेकं, तन्मेमन: शिवसंकल्पमस्तु।।** -(शु.य.मा.सं. ३४/१)

पूर्णमदं शिवसंकल्पसूक्तं मनोविज्ञानमयं हि विद्यते। एतदतिरिक्तं विश्वेदेवासूक्तेऽपि सम्पूर्णे मनोविज्ञानस्य निदर्शनं विद्यते।

**आनो भद्रा: क्रतवो यन्तु विश्वत:................रक्षितारोदिवेदिवे** -(ऋग्वेद १/८९,१)

**भद्रं कर्णेभि: श्रृणुयामदेवा भद्रं पश्येमाक्षभिर्यजत्रा:।** -(ऋग्वेद १/८९,८)

एवम् वैदिकवाङ्मये मनोविज्ञानस्य पूर्णं निदर्शनं परिलक्ष्यते।

**ओषधिविज्ञानम् -**

वैदिककालीनसंस्कृतिधर्मयोरस्ति महत्त्वं सोमस्य। तन्महत्त्वं ऋग्वेदकालत एव अवलोक्यते। वैदिकवाङ्गमये वनस्पतीनां वर्णनं यत्र तत्र बाहुल्येन समुपलभ्यते। तेषु वनस्पतिषु सोमलताया: महनीयमहत्त्वं विद्यते। वैदिकसाहित्ये **''सोमोऽस्माकं ब्राह्मणानां राजा''** इति रूपेण विशदीकृतम्। वैदिकसाहित्ये यत्र तत्र सोमस्य विविधस्वरूपाणि द्रष्टुं शक्यन्तेऽस्माभि:। **सोमोऽस्माकं ब्राह्मणानां राजा, ''सोमोवा ओषधीनां राजा'' सोमो वै प्राण:, सोमो वै वनस्पति:, वनस्पतयो वै, द्रु:, प्राणो वै वनस्पति:,** प्रभृतीनि उद्धृतवाक्यानि संहिताब्राह्मणारण्यकोपनिषद्ग्रन्थेषु विविधार्थान् प्रकटयन्ति।

वैदिकसाहित्ये क्वचित् भौतिकस्वरूपं तस्य च अभिषूतसोमरसस्य आह्लादकरं स्वरूपं दृग्गोचरी भवति, क्वचिच्च अग्नीन्द्रविष्णुरुद्रमरूत्सावित्र्यादिविविधदेवै: सह सोमस्य दैवीस्वरूपमप्युपलभ्यते। ऋग्वेदस्य नवममण्डलं पवमानमण्डलत्वेन आख्यायते। यस्मिन् समग्ररूपेण सोमसम्बन्धिन: मन्त्रा: संकलिता: सन्ति। यत्र सोमस्य लौकिकपारलौकियोरूभयो: रूपयो: दर्शनं भवति।

मुञ्जवत: पर्वतात् निष्पन्न: सोम: यत्र क्वचित् विशेषौषधिरूपो लतारूपो वा विद्यते, तच्च क्वचिद् द्युलोकत: आहृतस्य सोमस्यापि वर्णनं यत्र तत्रोपलभ्यते। मुञ्जवत: पर्वतस्य यावन्महत्त्वं दरीदृश्यते तन्न भारतीयसाहित्य एव अपितु प्राचीनतमे ईरानीयसाहित्येऽपि सोमस्योद्भवस्थानमाख्यायते। स्वर्गादाहृतस्य सोमस्य वर्णन ऋग्वेदे विविधसन्दर्भेषू-पलभ्यते।

वैदिककाले मानवानां जीवनं वनस्पतिमयमासीत्। अरण्येषु तु वनस्पतीनां बाहुल्यमासीदेव, ग्रामीणक्षेत्रेष्वपि तेषां प्राचुर्य्यमासीत्। अस्मादेव कारणात् मनुष्य: स्वावश्यकताया: पूर्तिं तन्माध्यमेन अकरोत्। मनुष्य: प्रातरुत्थाय दन्तधावनत: आहारपर्य्यन्तं शय्यातश्च रथपर्य्यन्तं, इत्येतेषु सर्वेषु वनस्पतीनां प्रयोग एव तात्कालीनमानवसमाजस्य कृते आधारभूत: आसीत्। वस्त्राच्छादनान्यपि एतेभ्य: प्राप्यन्ते। स्नानानुलेपनाङ्गरागतैलप्रभृतीन्यपि वनस्पतिभ्य: रचयन्ति स्म जना:।

अङ्गना: स्वशृङ्गारप्रसाधने प्रायोजयन् पुरूषाश्च स्वशरसन्धानमनेन कुर्वन्ति स्म। गृहनिर्माणेषु वनस्पतीनां प्रभूतं महत्त्वमासीत्। गृहस्य नानाविधमुपकरणानि पात्रादीनि एतेभ्य: अरचयन् मानवा:।

यज्ञेषु वनस्पतीनां विशिष्टं महत्त्वमासीत् यज्ञशालारचनाप्रभृतियज्ञस्य परिधियूपजुहूपभृद्ध्रुवाप्रभृतिविविध-यज्ञपात्रेषु विभिन्नानां वनस्पतीनां व्यवहारो दरीदृश्यते स्म।

श्रौतयागेषु प्रमुखद्रव्यं सोमस्तु आसीदेव। यस्मात् कारणादयं ओषधिराडिति विशेषणं प्राप्यते। सोमाभावे प्रतिनिधिभूतानामन्येषां द्रव्याणामपि प्रचलनमासीत्तस्मिन्नेवकाले। एषां प्रकृतप्रयोजनातिरिक्तं विकारनिवारणार्थमपि वनस्पतीनां प्राचुर्य्येण प्रयोग आसीत्। यज्ञार्थं निर्दिष्टानामजामेषाश्वप्रभृतीनां पशूनां रोगनिराकरणार्थं चिकित्साकर्मणि प्रवृत्ता आसन्, चिकित्सायाम् इमे वनस्पतय: प्रयुज्यन्ते स्म। मनुष्या: स्वीयान् विविधान रोगान् व्याधीञ्चापाकर्तुम् ओषधीनामुपयोगं कुर्वन्ति स्म। प्रकारेणानेन वैदिककालीनमानवस्य योगक्षेमे वनस्पतीनां महत्त्वपूर्णं स्थानमविद्यत। इदमेव कारणमस्ति यत् वैदिकसाहित्ये ओषधिवनस्पतीनाञ्च प्रशंसा नैकेषु मन्त्रेषु समुपलभ्यते। ऋग्वेदस्यौषधिसूक्तं प्रसद्धितममस्त्येव, अथर्ववेदेऽपि नैकानि स्थलानि एतादृशानि सन्ति यत्र मन्त्रद्रष्टार: ऋषय: वनस्पतीनां प्रशंसा: स्तुतींश्च कृतवन्त:।

वैदिकसाहित्ये वनस्पतीनां विभाजनं विशदेन प्राप्यते। यस्मात् तस्य स्वरूपं गुणकर्मणो: पूर्णतां याति। सन्दर्भेऽस्मिन् ऋग्वेदस्य ओषधिसूक्तं द्रष्टुं शक्यते।

**या: फलिनीर्या अफला अपुष्पा याश्च पुष्पिणी:।**
**बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वं हस:।। (ऋ. १०:९७:१५)**
**ओषधी: प्रतिमोदध्वं पुष्पवती: प्रसूवरी:।**
**अश्वा इव सजित्वरीर्विरूध: पारयिष्णव:।। (ऋ. १०:९७:३)**
**या ओषधी: पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनैनु बभ्रूणामहं शतं धामानि सप्त च।।**

प्राचीनै: ऋषिभि: पत्रपुष्पफलकाण्डाद्यवयवानां रचनात्मकविशेषतानां, उद्भूतस्थानानां गुणकर्माणि च सूक्ष्मदृष्ट्या निरीक्ष्य तदाश्रिते वनस्पतीनां नैके वर्गा: संस्थापिता: औद्भिद्द्रव्यवनस्पति- वानस्पत्यवीरूधओषधिप्रभृतय: चतुर्षु वर्गेषु विभज्यन्ते। विभाजन क्रममिदं चरकसंहितायामपि प्राप्यते।

श्रौतयज्ञेषु यूपपरिधिदण्डसम्यस्त्रुव्स्रुवसुरवचमसोपमन्थनी अरणीप्रणीताप्रोक्षणीप्रभृतीनां पात्राणां निर्माणं अश्वत्थशमीविकंकतौदुम्बरकाष्ठविशेषैरकुर्वन्। यज्ञेषु बिल्वखदिरपलाशरोहितकौदुम्बरकाश्मर्यरज्जुदाल-सुगन्धितेजन-प्रभृतय: प्रमुखा: वृक्षा: सन्ति। एकस्मिन् स्थले ऋग्वेदस्य ५/५४/६ वृक्षशब्दस्य सायाणाचार्येण अर्थ: कृत: मेघ: **(वृश्च्यते विदार्यत इति वृक्षो मेघ:)** ऋग्वेदाथर्ववेदयो: औषधिशब्द इति नैकवारं प्रयुक्त: अस्ति। सायणाचार्य: अस्य निरुक्ति: व्याख्या च विविधप्रकारमकरोत्। ते यथा –

ओषधी: प्रियङ्गुव्रीह्यादि: ऋ.१:१६६:५, ४:५७:३, ६:३९:५, ओषधयो ब्रीहियवाद्या:, शौ० ४:१५:२, ११:६:१७, ११:७:२०, ८:२:२२। ओषध्य: फलपाकान्ता: ऋ० १:९०:६ ओषध्य: फलपाकान्ता: लता: ऋ. ८:२७:२ ओष: फलपाक; अस्यां धीयत इति ओषधी:। शौ. १:२३:१, ओष: पाक आसु धीयत इति ओषधय: सर्वा वीरुध:। शौ. ६:९५:३ ओषं धयेति तत् ओषधय: समभवस्तस्मादोषधयो नाम। शत. ब्रा. २:२:४:५। ओषधी: तृणानि। ऋ. १०:१६९:१, ओषधी: पक्वफलसंयुक्तास्तृणगुल्मादिका:। ऋ. ३:३४:१० ओषधी: अन्नानि। ऋ. १:१६३:७, ५:८४:१०। (अजीजन ओषधीर्भोजनाय) ओषन्तिमाद्यन्ति अनेनेति ओष: सोम: स धीयते निधीयते येष्वित्योषधयो ग्रावाण: ऋ. वेद १०:१६९:३१। ओषधी: ओषध्याभिमानिनो देवान् ऋग्वेद ६:२१:९।

अनेनैव प्रकारेण वनस्पत्योषधी फलपाकान्तलतातृणान्नग्रावादेवप्रभृतय: विविधार्थांश्च प्रतिपाद्यन्ते यास्केन अस्य निर्वचनं कृतमित्थम् - ओषधय: ओषद्धयन्तीति वा। ओषत्येना धयन्तीति वा। दोषं धयन्तीति वा। निरुक्त ९:२७। अर्थात् य: शरीरे शक्तिमुत्पाद्य तस्य धारयेत् अथवा यान् दोषानपहरेत्।

अनेनैव प्रकारेण संहिताब्राह्मणारण्यकोपनिषद्पुराणस्मृतिग्रन्थानामतिरिक्तं लौकिकसंस्कृतसाहित्येऽपि वनस्पतीनां चर्चा वाल्मीकिव्यासकालिदासभासमाघप्रभृतय: कवय: स्वकीये ग्रन्थे यत्र तत्र विविधै: स्वरूपैरूल्लेखनं कृतवन्त:।

**निदानम् –**

औषधिविज्ञानसन्दर्भे, आयुर्विज्ञानक्षेत्रे आयुर्वेदिकचिकित्साविज्ञानमविषये तु पूर्णमेवाथर्ववेदमेवप्रमाणम्। दीर्घायु प्राप्त्यर्थं बहव: सूक्त्य अथर्ववेदे प्रमाणं तेषां निदर्शनमेव केवलम् अत्र प्रस्तूयते।[१] अपां भेषजमत्र वर्तत्ते।[२] सुखपूर्वकं प्रसवं भूयात् एतस्मिन् विषये प्रार्थनाकृता।[३] यक्ष्मनाशनम्[४] रुधिरस्त्रावनिवृत्तये धमनीबन्धनम्५, हृदयाघातम् (Heart Attack)[६], श्वेतकुष्ठ निरोध: रोगोपचारश्च[७] ज्वरनिरोध: संगोपचारश्च[८] मेधावर्धनम् बुद्धिवर्धनम् वा उपचार:[९] १०- चित्तविभ्रमोपचार:[१०] (Madness) ११- क्लीव्यत्वनिरोध:[११] रोगोपचारश्च १२- सर्पच्छेदनोपचार: विषनिरोधश्च[१२] १३- गण्डमालाचिकित्सा[१३], १४- दु:स्वप्ननाशनम्[१४] १५-प्राणास्तमे न निर्गच्छन्तु जीवेम शतायुरिति[१५] १६- दु:खमोचनम्[१६] १७- रोगनिवारणम्[१७], १८- रोगशाान्ति:[१८] १९. बलपुष्ट्यर्थं रोहिणीवनस्पतेरुपयोग:[१९] २०. मृत्युसंस्तारणोपाया:[२०] २१. कृमिनाशनम् २२. गर्भाधानम् (५.२५.१-१३), २३. गर्भदोषनिवारणम्। (८.६.१-२५) २४. गर्भरक्षणम् (६.८१.१-३), २५ पुंसवन (६.११.३) २६. यस्य गर्भधारणं भवति तस्य गर्भधारणार्थम् उपाया: २७. केशक्षयनिरोध: केशवर्धनञ्च (६.२१.१-३, ६.१.३७) २८. कुष्ठरोगात् रक्षणार्थ (६.९५.१-३) चतुष्पदेभ्यश्च औषधय: (६.५९.१-३) अन्याचिकित्साश्च (६.९५.१-३) विद्यन्ते। एवं परिलक्ष्यते यदस्माकं वैदिकवाङ्मये बहूनि विज्ञानत्तत्वानि सन्निहितानि सन्ति। एवम् वैदिकवाङ्मये –

एवं वेदेषुबहव: आयुर्वेदिकचिकित्साविज्ञान सन्दर्भ: दृश्यते। एवम् वेदाध्ययनं जीवनं पावयति। चिन्ताकुलं जगत् चिन्तायास्त्रायते, लोकानां विविधा: समस्या: निवारयति, जीवनमुन्नयति, सद्भावांश्च प्रेरयति, किञ्च सर्वमेव भारतीय संस्कृति सम्मता: वाङ्मय: वेदमेवसमुपजीव्य संराजन्ते। अत एव अस्माभि: सर्वेषां वैदिकवाङ्मयानां किञ्च सर्वम् संस्कृतसाहित्यम् एकवारमवश्यमेवानुशीलनीयम्। अत: परम् ऋग्वेदस्य विश्वेदेवासूक्त मन्त्रेण सह स्ववाक्यम् विरमामि-

**आनो भद्रा: क्रतवो यन्तु विश्वत:**
**अदब्धासो अपरीतास उद्भिद:।।**
**देवा नो यथा सदमिद्वृधे**
**असन्नप्रायुवो रक्षितारो दिवे दिवे।। (ऋ० सं० १०.८९.०१)**
**।। इति शम्।।**

**सन्दर्भा: -**


१. अथर्ववेद- १.३०.१-४, १.३५.१-४, २.४.१-६, २.१३.१-५, ३.११.१-८, ५.२८.१-१४, ५.३०.१-१७, ६.४१.१-३, ६.७६.१-४, ६.११०.१-३, ७.३२,३३,३४, ८.१-२,१९,६१,६३,७०,६४.
२. अथर्व सं. १.६.१-४, ६.२२.१-३, ६.२३, ६.२४, ६.५७.१-३,
३. तदैव- १.११.१-६.
४. १.१२.१-४, २.३३.१-७, ३.७.१-७, ३.३१.१-११, ६.२०.१-३, ६.९१.१-२, ६.१२७.१-३, ९.८.१-२२, १२.२.१-४,
५. १.१७.१-४,
६. १.२२.१-४,

७. १.२३.१-४, १.२४.१-४, २.२८.१-५, २.२९.१-७,
८. १.२५.१-४, ६,१३०,१३१,१३२, ७.१२१.
९. ६.१०८.१-५,
१०. ६.१३८.१-५
११. ७.५८.१-८,
१२. ७.७८,
१३. ६.४५, ६.४६.१-३, ७.१०६, १९, ५६, ५७,
१४. ११.४.१-२६,
१५. १६.१
१६. ४.१३.१-७, ६.४४.१-३,
१७. ५.१५.१-१२,
१८. ६.१२.१-७, ६.३५.१-३
१९. ४.३५.१-७
२०. ४.३७.१-१२, ५.२३.१-१३.

**सन्दर्भग्रन्थसूची-**

१. अथर्वसंहिता, सं० विश्वबन्धु, विश्वेश्वरानन्द वैदिक शोध संस्थान, होशियारपुर, १९६०.
२. ऋग्वेदसंहिता, सम्पादक विश्वबन्धु, विश्वेश्वरानन्द वैदिक शोध संस्थान, होशियारपुर, १९२६, १९६३-६५, वैदिक संशोधन मण्डल, पूना, १९३३-१९५१.
३. वेदचयनम्, डॉ० विश्वम्भरनाथ त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी, वर्ष १९८०.
४. अग्निचयन, डॉ० विश्वम्भरनाथ त्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, वर्ष १९९०.
५. शतपथब्राह्मण, अच्युतग्रन्थमाला, काशी, चौखम्भ्बा संस्कृत सीरीज आफिस, वाराणसी, १९६४.
६. शुक्लयजुर्वेदीय माध्यन्दिनवाजसनेयिसंहिता, मोतीलाल बनारसीदास, दिल्ली, १९७१.
७. आम्नायिकी, यू.जी.सी. केयर लिस्टेड पत्रिका, अंक १५-२२, वर्ष २०१८-२०२२.

❐